Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 4 | ISSN : 2581- 6306

# कालिदासदृष्ट्या पर्यावरणम्

**तरूणमण्डलः**
सहकारी अध्यापकः, संस्कृतविभाग :, गुरुदासकलेजः, पश्चिमवङ्गः।

**Article Info**
Volume 5, Issue 4
Page Number : 13-19

**Publication Issue :**
July-August 2022

**Article History**
Accepted : 01 July 2022
Published : 20 July 2022

ABSTRACT

**सारांशः-** सर्वं जगत् भवति नाम पर्यावरणाधीनम्। अर्थात् तेजो वायुः जलं, मृत्तिका, मरुः पर्वताः वनानि वृक्षाः जीवा इत्यादीनि तत्त्वानि सम्मिल्य पर्यावरणं निर्मान्ति। अधुना सम्पूर्णविश्वस्य समक्षं याः समस्याः विद्यन्ते तासु पर्यावरणस्य समस्यायाः - स्थानं प्रमुखतमस्ति। अत एव पर्यावरणसमस्यायाः सीमाङ्कनं किं भविष्यति इति विषयः विचारणीयः। अत एव साहित्यशास्त्रे कविकालिदासेन पर्यावरणविषये किं किं चिन्तितम् इति मनसि निभाल्य मया **कालिदासदृष्ट्या पर्यावरणम्** इति शीर्षकमाश्रित्य लेखः विलिखितः।

**विशेषशब्दाः-** गोसेवाकार्ये, वृक्षाणां रक्षा, सम्प्रतिकाले पर्यावरणस्थितिः, वर्त्तमानयुगे पर्यावरणप्रदूषणस्य समस्या, वायु प्रदूषणम् किं, पर्यावरणस्य प्रभावः कुप्रभावश्च इत्यादयः।

## भूमिका

**अपारे काव्य संसारे, कविरेव प्रजापतिः।**
**रोचते विश्वं, यथा तथेदं परिवर्तते।।**

अङ्गीक्रियते सर्वैः कविर्भवति समाजस्य निर्माता द्रष्टा चेति। **कविर्मनीषी परिभः स्वयम्भू** इति श्रुतेः समाजस्य निर्माणे समाजे सुव्यवस्थाये कवेः योगदानं सर्वाधिकं दृश्यते। कवेः मुख्यकर्त्तव्यम् अस्ति समाजे सुखशान्त्यानन्दमयवातावरणस्य निर्माणे सहयोगप्रदानम्। कथानाटकगद्यमाध्यमेन शिक्षाप्रदानं कवेः मुख्यं कर्तव्यं भवति कविना स्वकीयज्ञानेन काव्यानि विरचय्य समाजे आदर्शस्थापनाय कार्य क्रियते। समाजे सर्वे रामवत् आचरणं कुर्वन्तु एतदर्थं प्रयत्नः एव कवेः मुख्यकर्तव्यम् अस्ति। कविना आदर्शपात्राणाम् उपस्थापनं कृत्वा समाजे आदर्शाङ्गीकरणस्य शिक्षा प्रदीयते। कविः कालिदासः स्वकीयरचनासु पर्यावरणशिक्षां स्वकीयनिर्मितैः पात्रैःप्रदर्श्यते। तद्यथा–

रघुवंशस्य नायकः प्रकृत्याः परमरक्षकः दृश्यते। वनेषु सः गोसेवाकार्ये दृश्यते। गोसेवया पर्यावरणस्य रक्षा भवति। असौ राजा सिंहस्य कृते स्वकीयं शरीरं भोजनपदार्थवत् प्रस्तुतवान्। यथा

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**तथेति गामुक्तवते दिलीप:, सद्य: प्रतिष्ठम्भविमुक्तबाहु:।**

**सन्यस्तशस्त्रो हरये स्वदेह मुपानयत्पिण्डमिवामिषस्य।।[1]**

वृक्षाणां रक्षा पर्यावरणस्य कृते आवश्यकमस्ति। देवदारुवृक्षस्य रक्षायां सिंह: आसीत् इति वर्णनं रघुवंशे दृश्यते। यथा

**भवानपीदं परवानवैति महान्हि यत्नस्तव देवदारौ।**

**स्थातुं नियोक्तुर्नहि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन।।[2]**

अभिज्ञानशाकुन्तले पर्यावरणस्य शिक्षा सर्वत्र दृश्यते। शकुन्तला वृक्षस्य सीञ्चनं स्वयं करोति वृक्षं प्रति तस्या: स्नेह: कीदृश: आसीत् इति विषयस्य वर्णनम् अवलोक्यताम् तावत्। यथा –

**पातुं न प्रथमं व्यवस्थति जलं युष्मास्वपीतेषु या,**

**नादत्ते प्रियमण्डनाऽपि भवतां स्नेहेन या पल्लवम्।**

**आद्ये व: कुसुमप्रसूतिसमये यस्या भवत्युत्सव:,**

**सेयं याति शकुन्तला पतिगृहं सर्वेरनुज्ञायताम्।।[3]**

कुमारसंभवस्य नायिका पार्वती अपि वृक्षाणां सीञ्चनं स्वयं करोति। यथा

**अतन्द्रिता सा स्वयमेववृक्ष कान्घटस्तनप्रस्त्रवणैर्व्यवर्धयत्।**

**गुहोपि येषां प्रथमाप्तजन्मानां न पुत्रवात्सल्यमपाकरिष्यति।।[4]**

अनेन ज्ञायते यत् कालिदासेन सर्वेषां कृते इयं शिक्षा प्रदीयते यत् वृक्षाणां सीञ्चनं वृक्षाणां रक्षणम् आवश्यकम् अस्तीति वृक्षाणां च्छेदनेन पशूनामभिवन्धनेन च नरकस्य प्राप्ति: भवतीति पञ्चतन्त्रे प्रतिपादितम्। मत्स्यपुराणे तु

**एक: वृक्षो दशपुत्रसदृशो मन्यते दशकूपसमा वापी,**

**दशवापीसमोद्रुम: दशद्रुमसम: पुत्र: दशपुत्रसमो द्रुम:।।5**

यथा वृक्षेषु मानवानाम् इव भावनी भवति। इति विषयस्य शिक्षाऽपि कविकुलगुरुकालिदासेन अभिज्ञानशाकुन्तले दत्ता।

**उद्गलितदर्भकवलामृगा: परित्यक्तनर्तना मयूरा।**

**अपसृतपाण्डुपगा मञ्चन्त्यश्रूणीव लता:।।6**

अर्थात् शकुन्तलाया: पतिगृह गमनकालेवृक्षा: अपि रुदन्ति। पर्यावरणस्य निर्माणे पशुपक्षिणां महत्वपूर्णयोगदानमस्ति। पक्षिणां कृते भोजनप्रदानस्य शिक्षा स्वकीयासु रचनाषु दत्ता। तत्र कुमारसंभवस्य नायिका पार्वती स्वयं भोजनं ददाति। यथा

**अरण्जबीजाञ्जलिदानलालिता स्तथा च तस्यां हरि मुखभ्रष्टास्तरूणामध:,**

---

[1]. रघुवंशे- 2.51

[2].रघुवंशे 2.56

[3]. अभिज्ञानशाकुन्तलम् का भ्र . पं.सी. चतुर्वेदी चतुर्थसर्ग 92

[4]. कुमारसंभवम् का . रा . पं . सी . रामचतुर्वेदी पञ्चमसर्ग -14

[5]. मत्स्यपुराण हिमादि अ 9

[6]. अभिज्ञानशाकुन्तल चतुर्थ 12

**प्रस्निग्धाः क्वचिदिगुदीफलमिदः सूच्यन्त एवोपलाः।**

**विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगास्तोयाधारपथाश्च**

**वल्कलशिखानिष्यन्दरेखाङ्कि ताः।।**[7]

पशोः हत्याः पर्यावरणस्य कृते उचितं नास्ति। दिलीपस्य माध्यमेन सिंहस्यापि हत्यायाः विरोधः कविकुलगुरुणा कालिदासेन प्रस्तुतः।

❖ **पर्यावरणस्थितिः-** सम्प्रति सम्पूर्णविश्वस्मिन् पर्यावरणस्य स्थितिः चिन्तनीया अस्ति। अस्माकं पर्यावरणे सर्वत्र विभिन्नाः दोषाः अवलोक्यन्ते। पर्यावरणस्य दोषे सति मानवानां स्थितिः दयनीया दृश्यते। मानवेषु विभिन्नरोगाः दृश्यन्ते। अधिकांशजनाः विभिन्नरोगैः ग्रस्ताः अवलोक्यन्ते। समाजे जलप्रदूषणस्य समस्या, स्थलप्रदूषणस्य समस्या, ध्वनिप्रदूषणस्य समस्या अवलोक्यन्ते। वर्त्तमानपरिप्रेक्ष्ये एतेषां प्रदूषणानां किं कारणम् इति विषयस्य विवेचनं आवश्यकमस्ति। वर्त्तमान समये पर्यावरणतत्त्वानां का स्थितिः इति विवचनीया। सम्प्रति पर्यावरणे जलप्रदूषणस्य समस्या सर्वाधिका दृश्यते। भारतीयस्वास्थ्यमन्त्रालयस्य वार्षिक प्रतिवेदने कथितं यत् विकासशीलदेशेषु प्रतिवर्ष 2.50 कोटिजनाः जलप्रदूषणस्य कारणेन रोगग्रस्ताः सन्ति। भारते नद्याः जलं प्रदूषितं दृश्यते। वाराणस्यां गंगायाः जलम् अति प्रदुष्टम् अस्ति। सर्वकारेण ' गंगा सफाई कार्ययोजना प्रवर्तिता। औद्योगिककारणात् विकसितदेशेषु विकासशीलदेशेषु च जलप्रदूषणस्य समस्या उत्पन्ना। प्रतिदिनं बृहद् औद्योगिक केन्द्रात् अस्वच्छजलेन सह प्रदूषितं पदार्थ नगरस्थितनदीषु प्रक्षिप्यन्ते। अनेन नद्याः जलेषु सल्फेट, नाइट्रेट एवं क्लोराइडीनामक हानिकारकतत्वानां वृद्धिः संजायते। अतः जलात् ऑक्सीजन इति पदार्थस्य मात्रायाम् न्यूनता आगच्छति। अनेन जलपानेन मानवाः विभिन्नरोगग्रस्ताः जायन्ते। एवं पंचत्वं प्राप्नुवन्ति जीवाः मानवाश्च। जलप्रदूषणेण जलजीवानां वनजीवानामपि अस्तित्वस्य समाप्तिः भविष्यति। अनेन प्रकृत्यां, वैषम्यं भविष्यति। वैषम्यात् प्रकृत्याः विनाशस्य समस्याः भविष्यन्ति। जलप्रदूषणस्य समस्यायाः कारणम् मानवेषु अशिक्षा अस्ति। सम्प्रति विश्वस्मिन् समुचितशिक्षया अभावः वर्त्तते। शिक्षायाः प्रचारेण प्रसारेण च जलप्रदूषणस्य समस्यायाः समाधानं भवितुं शक्यते।

सम्प्रति विश्वे वायुप्रदूषणस्य समस्याऽपि विकरालरूपे दृश्यते। जनसंख्यायाः वृद्धित्वात् वनानां विनाशत्वात् औद्योगिककारणात् च प्रतिदिनं वायुप्रदूषणे वृद्धित्वम् भवति। मोटरयानानां वृद्धिकारणात् अपि वायुप्रदूषणस्य समस्या दृश्यते। औद्योगिककेन्द्रेभ्यः मोटरयानेभ्यः च यः धूमः आकाशे गच्छति तेन धूमेन कार्बन - डाइऑक्साइड् नामकवायोः मात्रायाम् वृद्धिः संजायते। ऑक्सीजननामक प्राणवायोः अभावः भवति। अनेन वायुप्रदूषणं संजायते। वायुप्रदूषणत्वादपि प्रकृत्याः विनाशो भवितुं शक्यते।

वैज्ञानिकानां अनुमानम् अस्ति यत् यदि वायुमण्डले एवं प्रकारेण कार्बन डाइआक्साइड इति नामकस्य वायोः अनुपाते वृद्धित्वात् 150 वर्षेषु अस्माकम् पृथिव्याः तापक्रमे 4 डिग्री $co_2$ तापक्रमस्य वृद्धिर्भविष्यति। अनेन आर्कटिक सागरस्य हिमखण्डः जलरूपेण प्रवर्तिष्यते। अनेन मुम्बई, कोलकत्ता, चेन्नई, पणजी, कोचीनादीनां, समुद्रतटीयनगराणाम् अस्तित्वं विनाशे भविष्यति।

7. कुमारसम्भवम्- 1.15

वैज्ञानिकस्यानुसारेण वायुमण्डले कार्बन - डाइआक्साइडनामकवायो: वृद्धित्वात् ओजोनमण्डले छिद्राणि संजायन्ते। ओजोन मण्डलस्य छिद्रत्वात् ( विश्व स्वास्थ्य संगठन वार्षिक प्रतिवेदनेन इदं स्पष्टीकृतम्। ) क्लोरो - फ्लोरो कार्बन नामकस्य वायो: मात्रायाम् वृद्धि: भवति। अनेन शत् वर्षेण वायुमण्डलस्य ओजने सप्तारभ्य ( 7 ) त्रयोदश ( 13 ) पर्यन्त ओजोनस्य मात्रायाम् न्यूनता आगमिष्यति। अनेन त्वचा कैन्सरनामकस्य रोग: सामान्यरूपेण सर्वत्र भविष्यति। वृक्षाणां जीवानाम् च विनाशो भविष्यति। वायुप्रदूषणस्य कारणात् अम्लीयवर्षा यदा कदा भवति। अनेन अन्नानां वनानां विनाशो भवति। वायुप्रदूषणस्य कारणेन तपेदिकरक्तचापहृदयरोगानां वृद्धि: सम्प्रति विश्वे दृश्यते

सम्प्रति विश्वे ध्वनिप्रदूषणस्य समस्याऽपि लोचनपथमायाति। मुम्बई, दिल्ली, पेचिंग, रियो - डि - जेनेरो, तोकियो, न्यूयार्कादीषु नगरेषु ध्वनि: तृप्ता: 100 डेसीबलात् अधिकम् दृश्यते। अनेन मानवानां मानसिकस्थिति सोचनीया जायते। वैज्ञानिकसर्वेक्षणानुसारेण ध्वनिप्रदूषणस्य कारणात् 66 % जना: तेषु विकसित नगरेषु तनावग्रस्ता: अवलोक्यन्ते।

अनेन विवेचनेन अवगम्यते यत् अस्मिन् विश्वे पर्यावरणे प्रदूषणस्य स्थिति: अत्यन्तशोचनीया दृश्यते। प्रतिदिनम् पर्यावरणस्य स्थित्याम् विकरालता एव दृश्यते।

- **पर्यावरणप्रदूषणस्य समस्या-** वर्त्तमानयुगे पर्यावरणे प्रदूषणस्य महती समस्या अवलोक्यते। जनसंख्यायाम् अत्यधिकवृद्धित्वात् इयं समस्या विकरालरूपा जाता। औद्योगिककारणात् अपि वर्त्तमानयुगे पर्यावरणे प्रदूषणस्य समस्या उत्पन्ना। उपभोक्तावादी संस्कृत्या: प्रचलनत्वात् विश्वे वर्त्तमानयुगे पर्यावरणे वृद्धि: संजायते। समाजे धार्मिकभावनाया: अभावत्वात् समस्येयम् उत्पन्ना मानवानां कृते वृक्षानां सर्वाधिक महत्त्वम् मन्यते। वृक्षाणाम् महत्वम् प्राचीनकालात् दृश्यते। महान् अर्थशास्त्रज्ञाता कौटिल्य: उक्तवान् यत् वृक्षस्य पूर्णरूपेण छेदनं तु जधन्य अपराध:। धार्मिकस्थलेषु शैक्षाणिकसंस्थानेषु राजभवनेषु आरोपितानां वृक्षाणां छेदनार्थं द्विगुणिता दण्डव्यवस्था कौटिल्येन विहिता यथा-

**'द्रुमेष्वलक्षितेषु च त एव दण्डद्विभुज: कार्यराजभवनेषु च**

वसिष्ठधर्मसूत्रेषु, विष्णुधर्मसूत्रेष्वपि पुष्पितकलिनश्च वृक्षस्य छेदनार्थं दण्डव्यवस्था उल्लिखिताऽस्ति। वृक्षछेदनं पुत्रवत वध इति मन्यते धार्मिक भावनानां अभावत्वात् वृक्षानां छेदनं अत्यधिकं संजायते। पर्यावरणस्य संतुलनाय सम्पूर्णभूम्या: तृतीयभागे वनानां प्राप्ति: आवश्यकम् अस्ति। वनेभ्य: एव वायो: संरक्षणम् भवति। वनस्थित: वृक्षेभ्य: आक्सीजन नाम प्राणवायु: वायुमण्डले विकीर्यते। वायुमण्डले अवस्थित कार्बनडाइआक्साइड दूषित वायो: वनै: ग्रहणम् क्रियते। वनानां छेदनेन वायुमण्डले प्रदूषणस्य समस्या अस्मिन् विश्वे दृश्यते सम्प्रति। इदानीम् वनानां अभावात् भूम्यां क्षरणम् अस्य विश्वस्य महती समस्या दृश्यते। वनानां विनाशात् मलभूमि प्रदेशस्य वृद्धि: भवति।

इयमपि समस्या सम्प्रति सम्पूर्णविश्वे लोचनपथमायाति वनात् वर्षा अपि जायते। वनानां अभावात्। वर्षायामपि न्यूनता प्रतिवर्षम् सम्पूर्णविश्वे अवलोक्यते। भूमि स्थलप्रदूषणस्य समस्याऽपि वर्त्तमानयुगे पर्यावरणप्रदूषणस्य महती समस्या विद्यते। स्थलानां उर्वरतायै स्थलेषु वृक्षा: आवश्यका: सन्ति। सम्प्रति भूम्यां वृक्षाणाम् अभाव दृश्यते। औद्योगिक विकासत्वात् अपि स्थलप्रदूषणे वृद्धि: संजायते। पशुपक्षिनां विनाश: अपि स्थलप्रदूषणात् संजायते प्लास्टिक इति पदार्थस्य वृद्धित्वात् पर्यावरणे प्रदूषणसमस्या उत्पन्ना। अनुपरमाणु विद्युतादीनां पदार्थानां प्रचलनात् समाजे वर्त्तमानयुगे पर्यावरणप्रदूषणस्य समस्या उत्पन्ना।

अस्मिन् विश्वे आतंकवादस्य महती समया लोचनपथमायाति। आंतकवादस्य कारणात् अपि पर्यावरणे प्रदूषणे वृद्धिः संजायते। पर्यावरणस्य समस्यां प्रति पूर्णरूपेण चेतनायाः अभावः इदानीम् सम्पूर्णविश्वे दृश्यते। विभिन्न औषधानाम्, यन्त्रानां, वायुयानानां, आयुधानां, प्रचलनम् इदानीम् सम्पूर्ण विश्वे दृश्यते। एतेषां प्रचलनात् सम्पूर्णविश्वे इदानीम् पर्यावरणप्रदूषण समस्यायाः वृद्धिः संजायते। सम्पूर्णविश्वे मानवानां मध्ये शिक्षायाः अभावः अपि दृश्यते। मानवानां कृते शिक्षाया महत्वम् सर्वाधिकमस्ति। यदि शिक्षायाः प्रयोगः सम्पूर्णविश्वे सम्यक् रूपेण भवेत् तर्हि पर्यावरणस्य समस्या समाप्ता भविष्यति।

**अमुं पुरः पश्यसि देवदारुं,**

**पुत्रीकृतोऽसौ वृषमध्वजेन।**

**यो हेमकुम्भस्तननिःसृतानां,**

**स्कन्दस्य मातुः पयतां रसज्ञः।।**

अर्थात् तस्मिन् समये भगवान् शंकरः देवदारुवृक्षम् स्वपुत्रवत् स्नेहं करोति स्म। पार्वती अपि मातावत् वृक्षस्य रक्षनं करोति स्म। अनेन श्लोकेन कालिदासः पर्यावरणे प्रदूषणसमस्याया निराकरणाय वृक्षानां रक्षणं प्रतिपादितवान्। पर्यावरणस्य निर्माणे पशुपक्षिनामपि महत्वपूर्णयोगदानमस्ति। पशुपक्षिनां 1. रघुवंश – द्वितीयसर्ग –36

रक्षाये पर्यावरणे प्रदूषणसमस्याया निराकरणम् आवश्यकम् अस्ति। वनेषु पशूनां हत्या न भवेत् सुरक्षित वन – प्रदेशा भवेयुः। वनेषु मृगयाकार्यं न भवेत् इति विषयस्य शिक्षाऽपि कालिदासेन अभिज्ञानशाकुन्तले दत्तम्। यथा –

**न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्,**

**मृदुनि मृगशरीरे तुलराशाविषाग्नि।**

**क्व वत हरिणकानां जीवितञ्चातिलोलं,**

**क्व च निशितनिपाता वज्रसाराः शरास्ते।।**

अपि च,

**तत्साधुकृतसंधानं प्रतिसंहर सायकम्।**

**आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि।।8**

अस्मिन् श्लोके कविकुलगुरुणा प्रतिपादितम् यत् पशूनाम हत्या न स्यात्। राजादिलीपेन पशुनां भोजनस्य कृते स्वयं शरीरम् अर्पितम् यथा –

**तथेति गामुक्तवते दिलीपः सद्यः प्रतिष्टम्भविमुक्तबाहुः।**

**सन्यस्तशुत्रो हरये स्वदेह मुपानयात्पिण्डमिवामिषस्य।।9**

आदिकविना वाल्मीकिना अपि पशुहत्यायाः विरोधः कृतः। यथा –

**मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः सभाः।**

**यत्क्रोञ्चमिथुनादेक मवधीः काममोहितम्।।10**

[8]. अभिज्ञानशाकुन्तलम् प्रथमसर्ग 10–11

[9]. रघुवंशम् द्वितीयसर्ग – 5 9 3

[10]. वाल्मीकि रामायणम् 1

अर्थात् हे निषाद्। त्वम् नित्यां निरन्तरां शान्ति न लभे। यत्त्वं कौञ्चमिथुनात् एकं काममोहितम् अवधीः।

जलानां अपि पर्यावरणस्य निर्माणे महत्वपूर्णम् योगदानम् अस्ति। जलस्य महत्वस्य ज्ञानेन पर्यावरणे जलप्रदूषणस्य समस्यायाः निराकरणं भविष्यति। जलानां महत्वस्य प्रतिपादनम् कविकुलगुरुणा कालिदासेन अधोलिखित प्रकारेण विहितम्। यथा

**या सृष्टिः स्त्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री,**
**ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।**
**यामाहुः सर्वबीजप्रकृतिरिति यथा प्राणिनः प्राणवन्तः**
**प्रत्यक्षाभिः प्रपत्रस्तनुवितु वस्ताभिरष्टाभरीशः।।**

अर्थात् जलम् एव ब्रह्मणः आदिसृष्टि। जल अग्नि – होता- सूर्य – पृथ्वी वाय्वादीनि अष्टपदार्थानि प्रत्यक्षरूपे देवाधिदेव महादेवः शिवरूपेण दृश्यते। एतेषां तत्वानां सम्यक् रूपेण पूजनेन अर्थात् रक्षणेन देवाधि देवमहादेवः प्रसन्नो भविष्यति। देवाधिदेव महादेवस्य प्रसन्नत्वात् मानवाः स्वर्गस्य प्राप्ति करिष्यन्ति। अर्थात् भविष्ये आनन्दस्य अनुभवाय वायु – नल – भूमि आकाशादीनां पर्यावरण तत्वानां रक्षणम् आवश्यकमस्ति। एतेषां रक्षणेन पर्यावरण प्रदूषणस्य समस्यस्याः निराकरणं निश्चितरूपेण भविष्यति।

❖ **उपसंहारः**- पर्यावरणस्य सुरक्षायाम् एव जीवनस्य सुरक्षास्ति। पर्यावरणप्रदूषणस्य समस्या समकालीनविश्वस्य सर्वाधिका गम्भीरा जटिला च समस्यास्ति। अस्याः समस्यायाः सम्यक् ज्ञानं सर्वेषां कृते आवश्यकमस्ति। सर्वेषां कृते पर्यावरणस्य ज्ञानाय पर्यावरणमवलम्ब्य मया विषयोऽयम् अङ्गीकृतः पर्यावरणे प्रदूषणं कथं जायते ? वायु प्रदूषणम् किं ? जल प्रदूषणं किम् ? भूमि प्रदूषणं किम् ? ध्वनिप्रदूषणम् किमित्यादीनां विषयानां सम्यक् ज्ञानं सर्वेषां कृते आवश्यकमस्ति। प्रदूषणस्य प्रभावः जीवेषु कथं संजायते पर्यावरणस्य संरक्षणं कथं भवितुं शक्यते इत्यादिविषयस्य ज्ञानं सर्वेषां कृते भवेत्। महाकविकालिदासः पर्यावरणस्य महान् ज्ञाता आसीत्। तस्य रचनासु पर्यावरणस्य तत्त्वानि नरीनृत्यन्ते। कालिदासेन पर्यावरणस्य महत्वम् अङ्गीकृतम्। पर्यावरणस्य सर्वेषां तत्त्वानां महत्वम् अनेन महाकविना स्वीकृतम्।

पर्यावरणस्य परिवर्त्तनात् मानवस्य सर्वेषां जीवानाञ्च परिवर्त्तनं भवितुं शक्नोति पर्यावरणस्य शुद्ध्यर्थं प्रयत्नः स्यात् समाजेषु पर्यावरणस्य शुद्धयर्थं चेतनायाः जागृतिः स्यात्। समाजे धार्मिकभावनाया जागृतिः आवश्यकी। आधुनिकवैज्ञानिक समये पर्यावरणविज्ञानस्य अध्ययनं सर्वतोभावेन महत्वपूर्णमस्ति। पर्यावरणस्य प्रभावः कुप्रभावश्च सर्वेषां मानवानां शारीरिक-मानसिक-बौद्धिक-आध्यात्मिक भावनासु दरीदृश्यते। समाजे नद्याः महत्त्वस्य प्रचार; स्थलप्रदूषणस्य अवरोधः चेतनाया उत्पत्तिः स्यात्। जनसंख्यावृद्धेः विरोधो भवेत्। समाजे वृक्षारोपणं भवेत्, वनानां उच्छेदस्य विरोधः स्यात्। वनानां महत्त्वस्य प्रचारः भवेत्, इत्यादि कारणात्, मया विषयास्यास्य एव चयनं विहितम्। मम निबन्धेन यदि समाजे पर्यावरणस्य शुद्धयर्थं यदि प्रयत्नः स्यात् तर्हि मम प्रबन्धविषयचयनस्य सार्थकता भविष्यति। यदि समाजे पर्यावरणं प्रति नवीनचेतनीयाः प्रचारः भवेत् तर्हि एव मम प्रयत्नस्य सार्थकता भविष्यति।

**परिशीलितग्रन्थसूची**

1. स्वास्थ्य शिक्षा ओर् पर्यावरण अध्यायनम्, विवेक कुमार सिंहः, के एस के पाब्लिकेशन्
2. अभिज्ञानशकुन्तलम्, कालिदासः,श्री सत्यनाराणयचक्रवर्ती, संस्कृतपुस्तकभाण्डारः, कोलकाता, 2008
3. रघुवंशमहाकाव्यम्, कालिदासः,  काशीनाथ पाण्डुरङ्ग तुकाराम, जावाजी दादाजी निर्माण सागर प्रेस मुम्बई संस्करण, 1898
4. कुमारसम्भवम्, कालिदासः, श्रीसुन्दरलाल जैन, मोतिलाल बनारसी दास, दिल्ली 1975
5. मेघदूतम्, कालिदासः, ज्ञान प्रकाशन, सुभाषबजार मेरठ,. 1888−1889
6. विक्रमोऽर्वशीयम्, कालिदासः, गोरेश्वर राम चन्द्रकाले, वैभवप्रकाशन एण्ड मुद्रणालय, मुम्बई 1975
7. मालविकाग्नीमित्रम्, कालिदासः, गोपाल मन्दिर लेन, वाराणसी 1977
8. मत्स्यपुराणम्,पं श्रीराम शर्मा, संस्कृतिसंस्थान , बेरली
9. महाभारतम्, वेदव्यासः, गीता प्रेस, गोरखपुरः
10. रामायणम्, शास्त्रश्रीनिवास, मेहरचन्द्र लक्ष्मणदास, दिल्ली